त्युत्तमाम्रः । तत्पर्य्यायः । चक्रतलाम्रः २ मध्वाम्रः ३ सितआम्रकः ४ वनेच्यः ५ मन्मथानन्दः ६ मदनेच्छाफलः ७ । तस्य कोमलफलगुणाः । कटुत्वम् । अम्लत्वम् । पित्तदाहदत्वञ्च । तस्य सुपक्वफलगुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥

बद्धशिखः, त्रि, ( बद्धा शिखा चूड़ा यस्येति । ) शिशुः । इति मेदिनी । खे, १५ ॥ शिखाबन्धनविशिष्टः । यथा, प्रायश्चित्ततत्त्वधृतवचनम् ।
"सदोपवीतिना भाव्यं सदा बद्धशिखेन तु ।
विशिखो व्युपवीतश्च यत् करोति न तत् कृतम् ॥"

बद्धशिखा, स्त्री, (बद्धा शिखा यस्याः ।) उच्चटा । इति मेदिनी । खे, १५ ॥ ( बद्धा शिखा केशकलापो यस्याः ।) सम्बद्धकेशा च ॥

बध, क बन्धे । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् । ) क, बाधयति । इति दुर्गादासः ॥

बध, ङ निन्दे । बन्धे । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् ।) ङ, बीभत्सते खलं लोकः । बधते तत्र त्यादयो न प्रयुज्यन्ते । इति रमानाथः ।
'माबधिष्ठा जटायुं मां सीतां रामाहमैच्छिषि ।'
इति भट्टिः । ६ । ४१ ॥ इति दुर्गादासः ॥

बधिरः,त्रि,(बध्नाति कर्णमिति । बन्ध+"इषिमदिमुदीति ।" उणा० १ । ५२ । इति किरच् । ) श्रवणेन्द्रियरहितः । श्रुतिशक्तिहीनः । काला इति भाषा । तत्पर्य्यायः । एड़ः २ । इत्यमरः । २ । ६ । ४८ ॥ कल्लः ३ अवशापटुः ४ । इति शब्दरत्नावली ॥ उच्चैःश्रवाः ५ । इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, मनुः ।११।५२।
"एवं कर्म्मविशेषेण जायन्ते सद्विगर्हिताः ।
अड़मूकान्धबधिराविशताकृतयस्तथा ॥"
बाधिर्य्यनिदानं यथा,—
"यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति ।
शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते ॥"
इति माधवकरः ॥
असाध्यबाधिर्य्यमाह ।
"बाधिर्य्यं बालवृद्धोत्थं चिरोत्थञ्च विवर्ज्जयेत् ।"
इति भावप्रकाशः ॥*॥
अस्यौषधम् ।
"कर्णमूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च ।
चतुर्ष्वपि च रोगेषु सामान्यं भेषजं स्मृतम् ॥
शृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च ।
कटूष्णं कर्णयोर्धार्य्यमेतत् स्यात् वेदनापहम् ॥१॥
कर्णमूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च ।
पूरणं कटुतैलेन हितं वातघ्नमौषधम् ॥ २ ॥
शिखरिक्षारजवारितृष्णतकल्केन साधितं
तैलम् ।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः ॥
शिखरी अपामार्गः ॥ ३ ॥
गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ।
सजलञ्च सदुग्धञ्च तद्बाधिर्य्यहरं परम् ।
क्षीरमजाजं ग्राह्यम् । बिल्वतैलम् ॥ ४ ॥" इति भावप्रकाशः ॥ यथा च ।
"शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
क्रिमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥" ५
इति गारुड़े १९७ अध्यायः ॥

ब(व)धूः, स्त्री, ( बध्नाति प्रेम्णा या । बन्ध+ऊः नलोपश्च । अन्तःस्थवादौ तु वहति संसारभारं उह्यते भर्त्रादिभिरिति वा । वह+"वहेर्धश्च ।" उणा० १ । ८५ । इति ऊः धश्चान्तादेशः । ) नारी । स्नुषा । पृक्का । इत्यमरः । २ । ६ । १०९, २।४।१२१॥ (अस्याः पर्य्यायो यथा,—
"पृक्का स्यादुत्राह्मणी देवी मरुन्माला लता
लघुः ।
समुद्रान्ता वधूः कोटिवर्षालङ्कापिकेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥) शारिवौषधिः । शटी । (अस्याः पर्य्यायो यथा,
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) नवोढ़ा । ( यथा, रघुः । ७ । ४ ।
"वरः स वध्वा सह राजमार्गं
प्राप ध्वजच्छायनिवारितोष्णम् ॥")
भार्य्या । इति मेदिनी । धे, १४ ॥ भरतेन अमरकोषटीकायां पवर्गीयबकारादिबन्धधातुना निष्पादितोऽयम् । मेदिनीकारेण तु अन्तःस्थवकारादिशब्दमध्ये संगृहीतः ॥ अथ नववध्वा द्विरागमनयात्रा । तत्राष्टमदशमद्वादशषष्ठचतुर्थवर्षाणि निषिद्धानि । मासाः मार्गशीर्षफाल्गुनवैशाखा विहिताः । पक्षः शुक्लः । पुष्यस्वातीहस्ताधनिष्ठोत्तराषाढ़ोत्तरफल्गुन्युत्तरभाद्रपद्रेवतीमृगशिरोरोहिणीपुनर्व्वसुपूर्व्वाषाढ़ा एतानि नक्षत्राणि विहितानि । सोमबुधबृहस्पतिशुक्राणां वाराः विहिताः । तिथयो यात्राप्रकरणोक्ताः । चन्द्रताराशुद्धौ कालशुद्धौ राहुसर्व्ववारवेलादिकमूलादीन् परित्यज्य कर्त्तव्या । इति ज्योतिषम् ॥
"कृत्ते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति ।
पुनरागमनं वध्वास्तद्द्विरागमनं विदुः ॥
विवाहमासि प्रथमं वध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्यं युग्माब्दं विचक्षणैः ॥
शुक्रा पितृगृहे नारी भुङ्क्ते स्वामिगृहे
यदि ।
दौर्भाग्यं जायते तस्याः शपन्ति कुलनायिकाः ॥"
इति ज्योतिस्तत्त्वम् ॥

बधूजनः, पुं, ( बधूरेव जनः । ) योषित् । इति त्रिकाण्डशेषः ॥ (यथा, माघे । ३ । ५२ ।
"क्षितिप्रतिष्ठोऽपि मुखारविन्दै-
र्वधूजनश्चन्द्रमधश्चकार ॥")

बधूटशयनं, क्ली, ( बधूटीनां शयनमिव । पृषोदरादित्वात् ह्रस्वाकारः । ) गवाक्षः । यथा,—
"वातायनं गवाक्षः स्याद्वधूटशयनन्तथा ॥"
इति त्रिकाण्डशेषः ॥

बधूटिः } स्त्री, ( अल्पवयस्का बधूः । अल्पार्थे
बधूटी, } टिः । पक्षे ङीष् । यद्वा, बधू+"वयस्यचरम इति वाच्यम् ।" ४ । १ । २० । इत्यस्य वार्त्ति० इति ङीप् ।) पुत्त्रभार्य्या । इति भरतधृतरत्नकोषः । सुवासिनी । इति हेमचन्द्रः ॥ अल्पा बधूः । यथा,—
"नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय ॥"
इति भाषापरिच्छेदः । १ ॥

बधूत्सवप्रसवः, पुं, ( बध्वा उत्सव आर्त्तवः स इव प्रसवः पुष्पादिर्यस्य । ) रक्ताम्लानः । इति राजनिर्घण्टः ॥

बध्रं, क्ली, ( बध्यतेऽनेनेति । बन्ध+"सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् । ) सीसकम् । इत्यमरः ॥ वप्रमिति पठति स्वामी ॥ (अस्य पर्य्यायो यथा,—
"सीसं बध्रञ्च वप्रञ्च योगेष्टं नागनामकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बध्री, स्त्री, ( बध्यतेऽनया । बन्ध+"सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् षित्वात् ङीष् । ) चर्म्मरज्जुः । इत्यमरः ।२।१०।१२ ॥ बध्री द्विरेफेति केचित् । बर्ध्रां चर्म्मबन्धे भवा बार्ध्री दीर्घादिरिति रुद्रः ॥

बन, द ङ उ याचने । इति कविकल्पद्रुमः ॥ ( तना०-आत्म०-द्विक०-सेट् । क्त्वावेट् ।) द ङ, बनुते । उ, बनित्वा बत्वा । इति दुर्गादासः ॥

बन्ध, श्री श बन्धे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-अनिट् । ) श्री, अबान्त्सीत् । श, बध्नाति । चक्रान्तं शठ सुष सुष शपथैः किं धूर्त्त निर्ब्बन्धसे । इत्यपपाठः । निर्ब्बध्यते इति पाठ्यमिति रमानाथः । वस्तुतस्तु अस्य नवन्तानित्यतया कर्म्मभावे आत्मनेपदे च सिद्धम् । इति दुर्गादासः ।

बन्ध, क बन्धे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् । ) क, बन्धयति । इति दुर्गादासः ॥ ( यथा, रामायणे । २ । ८४ । ४ ।
"बन्धयिष्यति वा पाशैरथवास्मान् बधिष्यति ॥")

बन्धः, पुं, ( बन्ध+हलश्चेति घञ् । ) आधिः । बन्धनम् । इति मेदिनी । धे, ९ ॥ शरीरम् । इति हेमचन्द्रः ॥ (कर्म्मजनिताद्दृष्टवशात् देहाद्देहान्तरोत्पत्तेः शरीरस्य तथात्वम् ।) गृहादिवेष्टनम् । इति शब्दरत्नावली ॥ तद्विवरणं यथा,
"रूपाष्टकैर्विनिहतो भवनस्य बन्धः
कर्त्तुः स्वऋक्षमिह युग्मशरैकनिघ्नम् ।
एकीकृतं रसनिशाकरयुग्मभक्त-
शेषं ततो भवति पिण्डपदं गृहस्य ॥
गृहभूमिसमाहृतपिण्डपदं
वसुलोचनरन्ध्रगजैर्गुणितम् ।
रविभूधरविंशदयोगहृत-
मायव्ययक्षितिनक्षपदम् ॥"